श्रीमते रामानुजाय नमः

# ॥ वरवरमुनि अष्टोत्तर शतनाम स्तोत्रम् ॥

श्रीशैलेशदयापात्रं धीभक्त्यादिगुणार्णवः ।
यतीन्द्रप्रवणो रम्यजामातृमुनिशेखरः ॥ 1

तुलामूलावतीर्णश्च शेषांशकलितोदयः ।
सुभगः करुणासिन्धुः सूरिसन्तोषकारकः ॥ 2

त्रिदण्डपाणिः काषायचेलो धवल विग्रहः ।
शिकी यज्ञोपवीती च श्रीमान् सर्वजगद्गुरुः ॥ 3

दिव्योर्ध्वपुण्ड्रदीप्ताङ्गः तुलसीमालिकाञ्चितः ।
पुण्डरीकविशालाक्षो महान् पुरुषपुङ्गवः ॥ 4

रङ्गेशमङ्गलार्थी च रमणीयगुणाकरः ।
जगदुज्जीवनकरो जानकीनाथजीवनः ॥ 5

प्रपन्नचातकाम्भोदः परिव्राजकमण्डनः ।
श्रीवैष्णवकुलाम्भोजभानुराश्रितकल्पकः ॥ 6

भट्टनाथार्यसेव्याङ्घ्रिर् वरदार्यप्रियङ्करः ।
श्रीवानाचलरामानुजार्यपूज्यपदद्वयः ॥ 7

अष्टविद्वत्परिवृतः सर्वसूरिनिषेवितः ।
लोकपावनचारित्रः सौम्यः पापविनाशनः ॥ 8

श्रीरङ्गनायकीपुण्यपुञ्जः सत्त्वनिकेतनः ।
श्रीजिह्वावदधीशानदासभाग्यफलोदयः ॥ 9

पराङ्कुशपदाम्भोजभृङ्गः कल्याणसागरः ।
शुचिर् भक्तिनिधिर्ज्ञानधीप्तो वैराग्यभूषणः ॥ 10

श्रीरङ्गनिलयः सर्ववेदवेदान्तपारगः ।
सर्वज्ञमौलिः सारज्ञोद्राविडाम्नायवर्द्धनः ॥ 11

व्याख्यातजगदाचार्यप्रबन्धो वैदिकोत्तमः ।
श्रीरामानुजसिद्धान्तवर्द्धनः कलिनाशनः ॥ 12

श्रीरामानुजसम्बन्धदायकः श्रीविधायकः ।
रामानुजार्यपारम्यस्थापकः तत्त्वदीपकः ॥ 13

मृदुः सर्वसमः शान्तोदान्तः स्वामी च वत्सलः ।
शेषीसुशीलः सुश्लोकः सुभाषीमोक्षदायकः । 14

हितवादी हितकरः प्रियवादी प्रियङ्करः ।
सुलभः सिद्धधर्माभिरक्षको देशिकोत्तमः ॥ 15

श्रीरङ्गनायकाचार्यः सेवकाव्याजबान्धवः ।
मन्त्ररत्नार्थनिष्णातो मन्त्रसारतमार्थवित् ॥ 16

बदरीतापसोद्गीतश्लोकः सुश्लोकवन्दितः ।
अस्तोकमहिमा लोकप्रकाशो लोकजीवनः ॥ 17

गोदापादाब्जसद्भक्तः कुशली कोविदप्रियः ।
सर्वपूर्वोत्तराचार्यसुधासागरचन्द्रमाः ॥ 18

पूर्णचन्द्रप्रभासान्द्रः पूर्णकामः पुराणवित् ।
देवदेवप्रियो दिव्यप्रभावो दीनशेवधिः ॥ 19

सत्यवाक्दक्षिणकलारक्षको धरणीधरः ।
प्रापकः प्राप्यभूतश्च प्रज्ञावान् प्रतिभाकरः ॥ 20

अर्थपञ्चकयाथात्म्यदायी दास्यामृतप्रदः ।
श्रीनृसिम्हार्यसम्सेव्यः श्रीमान् वरवरोमुनिः ॥ 21

इदम् श्रीरम्यजामातृमुनेरष्टोत्तरम् शतम् ।
दिव्यनाम महापुण्यम् पठ्यताम् पापनाशनम् ॥ 22

**॥ इति वरवरमुनि अष्टोत्तर शतनाम स्तोत्रम् ॥**